National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(64): 222-223
© 2026 NJHSR
www.sanskritarticle.com

**Dr.Harikrishna Kondapalli**
B.ED, M.A, M.Phil,
PhD, NET, TGT Sanskrit,
PM Shri KV Ongole

**Correspondence:**
**Dr.Harikrishna Kondapalli**
B.ED, M.A, M.Phil,
PhD, NET, TGT Sanskrit,
PM Shri KV Ongole

# संस्कृतसाहित्ये छन्दोविचारः, छन्दस्सु अनुष्टुपछन्द:

**Dr.Harikrishna Kondapalli**

**१.छन्दसः लक्षणं प्रयोजनश्च**

छन्द्यते इति छन्दः। पुंलिङ्गे - छन्द + भावे घङ् प्रत्यये छन्दः इति शब्दकल्पद्रुमे। अथवा छदि इत्यस्माद् धातोः छादेरादैश्छः इत्यनेन सूत्रेण असून् प्रत्यये छन्दः इति निष्पद्यते। छन्दयति छदयति काव्यशोभां वर्धयति इति छन्दशब्दस्य व्युत्पत्तिः।

वेदाः छन्दोबद्धाः भवन्ति। वैदिकमन्त्राणामुच्चारणज्ञानाय छन्दोज्ञानम् आवश्यकमस्ति ।

ऋग्वेदसामवेदयोः सर्वे मन्त्राः छन्दोबद्धाः सन्ति। यजुर्वेदस्य गद्यपद्यात्मकाश्च सर्वे मन्त्राः छन्दोबद्धाः एव सन्ति। छन्दोवेदाङ्गगस्य प्रतिनिधिभूतो ग्रन्थस्तु पिंगलाचार्यकृतं 'छन्दः सूत्रम्' वर्तते।

आचार्यपिंगलादारभ्य प्रचाल्यमानं छन्दःशास्त्रं वेदेषु लौकिकशास्त्रेष्वपि महत्वपूर्ण-स्थानं विभर्त्ति। वैदिकलौकिकशास्त्राणां च सम्यगुच्चारणार्थं तेषामर्थज्ञानार्थञ्च छन्दःशास्त्रस्य ज्ञानं नितरामावश्यकम्। तत्र वेदमन्त्रे प्रयुक्तं छन्दः वैदिकछन्दः, अपितु रामायणमहाभारतादौ प्रयुक्तानि च्छन्दांसि लौकिकछन्दोनाम्ना अभिहितानि भवन्ति। वेदपुरुषस्य पादस्थानीयो छन्दः। यथा पादविहीनः पुरुषः कुत्रापि गन्तुं न शक्नोति तथा छन्दःशास्त्राज्ञः पुरुषोऽपि वेदमार्गमनुसर्तुं न प्रभवति। अतः उच्यते **छन्दः पादौ तु वेदस्य**।[१] वर्णच्छन्दो गणच्छन्दो मात्राच्छन्दश्चेति छन्दसस्त्रयो भेदाः भवन्ति। **'न वा एकेनाक्षरेण च्छन्दांसि वियन्ति, न द्वाभ्याम्'**[२] पाद संख्यामात्रेणाक्षरसंख्यामात्रेण च वैदिकच्छन्दसां गायत्र्यादिव्यवहारः। तत्र किञ्चिन्न्यू-नाधिकतायामपि न च्छन्दोहानिर्भवति

पिङ्गलाचार्यकृतच्छन्दःशास्त्रात्पूर्वमपि शास्त्रेस्मिन् क्रौष्टुकि-यास्क-ताण्डि-सैतव- काश्यप एतमाण्डव्य-प्रभृतीनां शास्त्राण्यासन्निति पिङ्गलकृतात्तन्मतनिर्देशादवगम्यते। शौनकीयः प्रातिशाख्यः पिङ्गलाचार्या-दुत्तरकालिकाच्छन्दोग्रन्थकाराः।

लोकेऽपि छन्दः विना शब्दानां परिचयः न मिलतीति आचार्यपिङ्गलः कथयति। यथा-

**छन्दः शब्देनाक्षरसंख्यावच्छन्दोत्राभिधीयते।**[३]

अग्निपुराणम् अपि आचार्यपिङ्गलकृतं छन्दः सूत्रमामनति। तत्र छन्दसां गणविभागोऽपि विद्यते।

यथा -

**छन्दो वक्ष्ये मूलजैस्तैः पिङ्गलोक्तं यथाक्रमम्।**
**सर्वादिमध्यान्तगणौ म्नौ भ्यौ जौ स्तौ त्रिका गणाः ।।**[४]

राजशेखारः काव्यमीमांसाग्रन्थे उक्तत्वान् छन्दांसि काव्यपुरुषस्य रोमसमूहः। अतः उच्यते -

**रोमाणि च्छन्दांसि'**।[५]

**२.छन्दोगणविवेचनम्**

प्रायः सर्वेऽपि श्लोकाः पादचतुष्टयात्मिकाः भवन्ति। छन्दः, वृत्तमित्यपि कथ्यते। छन्दसां निर्देशः द्विधा कर्तुं शक्यते वर्णैः एवं मात्राभिः। तत्र छन्दःशास्त्रे अष्टौ गणाः निर्दिष्टाः। यथा -

**आदिमध्यावतानेषु भजसाः यान्ति गौरवम्।**

**यरताः लाघवं यान्ति मनौ तु गुरुलाघवम्।।"**[६]

तत्र अष्टौ गणाः क्रमशः यथा-

भगणः - ऽ।।

जगणः - ।ऽ।

सगणः - ।।ऽ

यगणः - ।ऽऽ

रगणः - ऽ।ऽ

तगणः - ऽऽ।

मगणः - ऽऽऽ

नगणः - ।।।

लघु - ।

गुरु - ऽ

**३.गुरुलघुनिर्णयज्ञानम् -**

**संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम्।**

**विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन।।"**[७]

अत्र चत्वारः नियमाः परिलक्ष्यन्ते। यथा-

१. संयुक्तवर्णस्य पूर्ववर्णः गुरुः भवति।

२. अनुस्वारयुक्तवर्णः गुरुः।

३. विसर्ग समाश्रितः वर्णः गुरुः।

४. विकल्पे पादान्तस्थवर्णोऽपि गुरुः भवति।

**४. अनुष्टुप् छन्दः-**

तत्र अनुष्टुप् छन्दसः लक्षणं यथा –

अनुष्टुब्गायत्रैः ।[८]

'चतुष्पाद्' इत्यनुवर्तते। गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः अनुष्टुप् संज्ञं भवति।

श्लोके षष्ठं गुरू ज्ञेयं सर्वत्र लघु पञ्चमम्।

द्विचतुष्पादयोः ह्रस्वं, सप्तमं दीर्घमन्ययोः ।।[९]

अनुष्टुप्छन्दः अष्टाक्षरविशिष्टम्। अत्र पादस्य षष्ठवर्णः गुरूः भवति, द्वितीयपादचतुर्थ पादयोः सप्तम वर्णः लघुः भवति। प्रथमपादतृतीयपादयोश्च सप्तमवर्णः गुरूः भवति। पुनः सर्वेषां पादानां पञ्चमवर्णः लघुः भवति। अस्य छन्दसः प्रयोगः यथा-

ऽऽ ऽऽ।ऽऽ1 ऽऽ ऽऽ।ऽ1 ऽ

प्राक्पारावारमारभ्य प्रत्यक् सिन्ध्वन्तमेव च।

ऽऽऽ।।ऽऽ।।ऽऽऽ।ऽ। ऽ

पर्वताधिपतेश्चैव पुनर्यावत्कुमारिकम् ।। "[१०]

अत्र प्रथमपादे षष्ठवर्णः 'मा', द्वितीयपादे षष्ठवर्ण 'मे', तृतीयपादे षष्ठवर्णः 'ते' चतुर्थपादे षष्ठवर्णः 'मा' गुरूवर्णाः। प्रथमपादस्य सप्तमवर्णः र, तृतीयपादस्य सप्तमवर्णः

'श्चै' गुरुवर्णौ। तथैव प्रथमपादस्य पञ्चमवर्णः 'र', द्वितीयपादस्य पञ्चमः वर्णः 'न्त', तृतीयपादस्य पञ्चमवर्णः 'प', चतुर्थपादस्य पञ्चमवर्णः 'त्कु' लघुवर्णाः। अतः छन्दो लक्षणानुसारम् अत्र अनुष्टुप् छन्दः।

**सन्दर्भग्रन्थः**

१. पाणिनीयशिक्षा

२. एतरेयब्राह्मणम्., १.६

३. पि.छ.सू.२१

४.अ.पु.३२८(अग्निमहापुराणम्, प्रो.पुष्पेन्द्रकुमार, ईष्टर्न बुक् लिङ्कर्स, दिल्ली, २००६)

५. का.की.पृ.६

६, ७. श्रुतबोधः

(श्रुतबोधः (श्रीमन्महाकविकालिदासप्रणीतः) , करूणा संस्कृत-हिन्दीव्याख्योपेता, कन्हैयालाल जोशी, चौखम्बापब्लिशर्स, वारणासी, २००३)

८.छ. शा., ३/२३ (छन्दःशास्त्रम्, परिमिलपब्लिकेशन्स्, दिल्ली, २००७)

९. श्रु.बो.,७

१०. प्र.प्र.,२/१ (प्रणयप्रसादनम्- श्री किशोरचन्द्रमहापात्रः)